# ગુરુરાજસ્તવઃ

Gururajastavah

sanskritdocuments.org

February 19, 2019

# Gururajastavah

# ગુરુરાજસ્તવઃ

## Sanskrit Document Information

Text title : gururAjastavaH

File name : gururAjastavaH.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Krishnanandasarasvati

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# ગુરુરાજસ્તવઃ

સદ્ગુરું ભજ સદ્ગુરું ભજ સદગુરુ ભજ બુદ્ધિમન્
    યેન સંસૃતિપારમેષ્યસિ મુક્ત ઇત્યપિ ગાસ્યસે ।
આસુરીં ત્યજ સમ્પદં વિપદાં પદં મુનિગર્હિતાં
    તર્હિ તાં ભજ સમ્પદં મુનિસંસ્તુતાં ભગવત્પ્રિયામ્ ॥ ૧॥

ગર્વ-પર્વત-મસ્તકે તવ સંસ્થિતિનં હિ શોભતે
    પાતમેષ્યસિ ઘાતકર્મણિ યુજ્યસે ન તુ પૂજ્યસે ।
સાત્ત્વિકં ફલમશ્નુષે યદિ સત્યવૃત્તપરાયણો
    દનુજસૂનુરિવામરદ્રુમમર્હણં ભગવત્પદમ્ ॥ ૨॥

દમ્ભમાર્ગપરાયણં યદિ સત્ફલાય ભવત્યહો
    ઇલ્વલાદિકૃતાઽપિ વિપ્રવરાર્ચના વિષમા કથમ્ ।
કષ્ટમેષ્યસિ દુષ્ટબુદ્ધિપરાયણો યદિ ચાઽન્તરે
    મૃષ્ટ મૃષ્ટ પરં પદં તવ દૂરતઃ સ્તવકર્મણામ્ ॥ ૩॥

મુક્તતાઽપિ મુમુક્ષુતા કપટૌઘમૂલનિકૃન્તની
    નીતિરર્ભકતા તથા યદિ નાસ્તિ જન્મ નિરર્થકમ્ ।
કેષુ તે ગણના ભવેદ્ વદ વિદ્યવેદ્યસમાન્તરે
    ભાસુરે જનજન્મ કર્મ નિરર્થકં કુરુષે કુતઃ ॥ ૪॥

સાધુચિત્તવિખણ્ડનાદ્ ભગવત્પ્રિયાવપિ દાનવૌ
    તત્ર સાધુવિઘર્ષણાદપિ રાક્ષસૌ મુનિભક્ષકૌ ।
તેન હીનબલાવથો નૃપનામદૂષકરાક્ષસૌ
    કૃષ્ણહિંસન-તત્પરાવિતિ કર્મણો ગહના ગતિઃ ॥ ૫॥

બ્રહ્મનિષ્ઠ -વિમાનનાન્નિજ -સૂનુગીતહરેઃ પદે
    દ્વેષ આવિરભૂદ્ભવગ્રહમાન્ત્રિકે નિજસેવિતે ।
દાનવસ્ય ચ દાનધર્મપરાયણસ્ય ચ રક્ષસઃ
    શૈવધર્મરતસ્ય મૂલવિનાશનોઽપ્યઘનાશને ॥ ૬॥

જીવતામપહાપયઞ્છિવતાં દિશત્યતિકૌશલાત્
    પૂર્વવત્ સ્થિતવિશ્વમેષ તિરષ્કરોત્યતિલીલયા ।
તં ગુરું ભજ નમ્રમોચનકારકં ભવતારકં
    તત્ર શાત્રવમત્ર યચ્છતિ વૃક્ષતાં પિતૃકાનને ॥ ૭॥

શ્રીગુરોઃ પદપઙ્કજં ભજતાં સતાં સતતં હરિઃ
    સન્નિધાવિતિ સર્વશાસનસારમેતદુદીરિતમ્ ।
તન્મહત્ત્વમહામ્બુધેરપરં તટં ન હિ કેચન
    પ્રાપ્નુવન્તિ પરાવરજ્ઞાઃ પણ્ડિતાઃ સનકાદયઃ ॥ ૮॥

શબ્દમૂલમહો ગુરુઃ શિવજીવવિશ્વભિદાસ્પદં
    વિશ્વજીવશિવાદિનામત એષ એવ હિ બુધ્યતે ।
વાચ્યકોટિનિવિષ્ટમેવ હિ તત્ત્રયં કૃતપત્ત્રયં
    લક્ષ્યભૂતવપુર્ગુરુસ્તમુ જાનતે ન હિ કેચન ॥ ૯॥

વૃત્ત્યનાશ્રિતચિત્સ્વરૂપક એષ એવ સમઃ પ્રભો
    વૃત્તિરૂઢચિદમ્બરં ખલુ જીવ ઈશ ઇદં જગત્ ।
જન્મ-મૃત્યુ-નિયામકઃ પરમેશ્વરઃ સ તુ ભોગભુગ્
    જન્મમૃત્યુ-નિવારકઃ પરમેશ્વરાદતિરિચ્યતે ॥ ૧૦॥

બ્રહ્મરન્ધ્રપદં ગુરોર્હૃદયં શિવસ્ય નિજાસ્પદં
    સ્થાનમેવ હિ તત્સ્વરૂપ-વિનિર્ણયાય ભવત્ફલમ્ ।
હૃદ્ધતો વિષયાન્ ભજત્યથ નૈવ કિઞ્ચન રન્ધ્રગો
    યચ્છતિ ક્રમતઃ ફલં વદ મુક્તિદોઽસ્ત્યનયોઽસ્તુ કઃ ॥ ૧૧॥

તત્સ્વરૂપવિમર્શનં ગુરુપાદુકામનુસંશિતં
    તત્મનુસ્તુ તદીયપૂર્ણકૃપાભરેણ હિ લભ્યતે ।
લાભતો ગુરુણા સહૈક્યવિમર્શનં પરમં પદં
    તત્ર મુક્તિવરાઙ્ગના વૃણુતે સ્વયં નિજસમ્પદા ॥ ૧૨॥

તત્ર યો વિમુખો નરો નિજઘાતકીર્તિ નિગદ્યતે
    તસ્ય સમ્મુખતાં ભજન્ પરમદ્વયં ભવતિ ક્ષણાત્ ।
ઋક્શ્રુતિઃ શતધારમિત્યપિ નૌતિ તાં ગુરુપાદુકાં
    કૃષ્ણભિક્ષુરિમં સ્તવં પદપઙ્કજેઽર્પયતે ગુરોઃ ॥ ૧૩॥

દ્રોણપર્વતવાસિને નતશાસિને મતિકાશિને

હારિણે વિપદાં મુહુર્મમ દાયિનેઽખિલસમ્પદામ્ ।
સચ્ચિદાદિસુખાભિધાય યતીશ્વરાય સહસ્રશઃ
સન્ત મે નતયો દયોદકસાગરાય દિને દિને ॥ ૧૪॥

સ્તોત્રમેતદભીષ્ટસિદ્ધિદ -માસુરવ્રત -હારકં
તારકં નિજદેશિ -કેન્દ્રપદાબ્જયોર્દૃઢસન્મતેઃ ।
ય પઠેત્ પ્રયત્નઃ શુચિઃ સુવિચાર્યં ભૂરિ દિને દિને
મુચ્યતે ભવપાશપાશિત એવમેવ મતિર્મમ ॥ ૧૫॥

ઇતિ શ્રીમત્કૃષ્ણાનન્દ-સરસ્વતીકૃત-ગુરુરાજસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Gururajastavah*

pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*